अवहित्थः करः स स्याद्दौर्बल्यादिप्रददर्शने ॥58 ॥
इति अवहित्थः । इति स पुटहस्ताः ।

अथ नृत्यहस्ताः [३०]

चतुरस्त्रौ करौ पूर्वमुद्धताख्यावतः परम् ।
ततस्तलमुखौ ज्ञेयौ स्वस्तिकौ विप्रकीर्णकौ ।।59।।

---

[1] M.को ।
[2] M.चरन्मुकु ।
[3] M.माना ।
[4] M.दा ।
[5] M.भरतमते अयं वर्धमानः स्यात् ।
[6] M.व ।
[7] अयं भरतमते निषधः इति प्रतीयते । अभिनयदर्पणे निषधवर्धमानयोरुल्लेखी नास्ति ।

In Public domain. Digitization Muthulakshmi Research Academy

अरालखटकास्यौ[1] च रेचितावधरेचितौ ।
आविद्धवक्रौ सूच्यास्या नितम्बौ पल्लवौ[2] तथा ।।60।।

लताख्यौ केशबन्धौ [च) मुष्टिक[3] स्व स्तिकौ मतौ ।
उत्तानवंचितौ पक्षवञ्चितौ करिहस्तकौ[4] ॥61॥

दण्डपक्षौ गरुडपक्षौ पक्षप्रद्योतकौ करौ ।
उरोमण्डलिनौ हस्तौ पार्श्वं मण्डलिनावपि ॥62॥

ऊर्ध्वमण्डलिनौ ज्ञेयावुरःपार्श्वार्धमण्डितौ ।
नलिनीपद्मकोशाख्यावल्वणावलपल्लवौ[5] ।
ललितौ वलितौ चेति त्रिंशन्नृत्त[6] करा मताः ।।63॥ [इत्युद्देशः]

समानकूर्परौ वक्षौ (?) वक्षसोऽष्टाङ्गुलांतरौ ।
प्राङ्मुखौ खटकावक्रौ चतुरस्रौ करौ मतौ ॥64॥ इति चतुरस्रः।

तालवृन्तवदुद्धूतौ हंसपक्षौ यदा करौ ।
वक्षसः संमुखीभूतावुद्धूताविति कीर्तितौ ॥65॥ इति उद्धूतः ।

हंसपक्षौ यदा हस्तावन्योन्याभिमुखं यदा ।
रेचितौ च करौ स[म्यक्] स्यातां तलमुखौ तदा ।।66।। इति तलमुखः।

मणिबन्धसमीपस्थौ[7] हंसपक्षविधौ करौ ।
स्थितौ स्वस्तिकरूपेण स्वस्तिकौ कथितौ करौ ॥67।। इति स्वस्तिकः ।

तावेव हंसपक्षाख्यौ विप्रकीर्णाविमौ[1] मतौ ॥68॥ इति विप्रकीर्णः ।

---

[1] M.ख्यो ।
[2] M.पलचौ ।
[3] M.मुष्टिकः इति सविसर्गः पाठ आदर्शे एवं परत्रापि । मुद्रितनाट्यशास्त्रेऽपि उद्देशावसरे तथैव पाठः लक्षणविधौ तु निविसर्गः ।
[4] ल्वकौ
[5] M.करहस्तक ।
[6] M त्ताः
[7] M.तौ ।

पुरस्ताद्[2]रसो न्यस्तो[3]ऽप्यरा [ल]खटकामुखः ।
तिर्यक् प्रसारितः किञ्चिदरालस्योन्नतोन्नतः ॥69॥

निजस्थानगतौ[4] चेत्तौ विन्यस्तौ व्यत्ययेन वा ।
मध्यापसव्यतः स्यातामरालखटकामुखौ ॥70।। इति अरालखटकामुखः

भुजांश-कूर्परांसौ च[5] विलासैः वर्तितौ करौ ।
अवाङ्मुखतलौ हस्तावुक्तावाविद्धवक्रकौ॥71॥ इति आविद्धवक्रः

भुजङ्गमस्तकौ हस्तौ बहिः क्षिप्ता कनिष्ठिका।
प्रसारित यदा[6].... तदा सूचीमुखो भवेत् ॥72।। इति सूचीमुखः।

हंसपक्षौ द्रुतभ्रान्तौ[7] पार्श्वदेशे प्रसारितौ ।
हस्तौ हस्तविशेषज्ञैः कथितौ रेचिताविमौ[8] ॥73॥ इति रेचितः ।

रेचितो दक्षिणो हस्तश्चतुरस्रस्ततः परः ।
हस्ताभिनयतत्त्वज्ञैस्तावुक्तावर्धरेचितौ ॥ 74॥ इति अर्धरेचितः ।

ललाट-कूर्परावंस[9] प्रान्तदेशनिवेशितौ ।
तिर्यङ्निवेशितौ[10]किञ्चिदुक्तावुत्तानवञ्चितौ ॥75।। इति उत्तानवञ्चितः।

उद् घात [11]पल्लवौ हस्तौ स्वस्तिकौ मणिबन्धकौ ।
पताकौ नृत्यतत्त्वज्ञः[1] कथितौ पल्लवौ करौ ॥76।।इति पल्लवः।

---

[1] M.र्णविधौ ।
[2] M.द ।
[3] M.स्तौ ।
[4] M.मता ।
[5] N.S.भुजांसकूर्पराग्रैस्तु ।
[6] प्रसारितौ यदाऽङ्गुष्ठौ इति स्यात् ।
[7] M.पक्षद्रुतभातौ ।
[8] M.धौ ।
[9] M.भ्यांसौ ।
[10] M.त ।
[11] उद्धस्य इति भवेत् ।

In Public domain. Digitization Muthulakshmi Research Academy

स्कन्धदेशाद्विनिष्क्रान्तौ त्रिपताकौ करौ यदा ।
नितम्बावि[ति]विख्या[2]तौ नितम्बावधरेचितौ ॥77॥ इति नितम्वः ।

पार्श्वतः केशबन्धाञ्च नित[3]म्बावुद्गतौ यदा ।
तदा ह[4]स्तविशेषज्ञैः केशबन्धाविति स्मृतौ ॥78॥ इति केशबन्धः ।

त्रि[5]पताकौ यदा हस्तौ पार्श्व देशप्रसारितौ ।
भूयो भूयोऽपि तत्रैव रेचितौ तौ लताकरौ ॥79॥ इति लताहस्तकः ।

त्रीपताकौ यदा हस्तौ कर्णौपान्तमुपागतौ ।
दोलितः पार्श्वतः पार्श्वे[6] कथितौ करिहस्तकौ ॥80॥ इति करिहस्तकः ।

कटीमस्तकलग्नाग्रौ त्रिपताकौ करौ यदि ।
प्रयोगज्ञै[7] स्तदा ज्ञेयौ पक्षव[8] ञ्चितकाविमौ[9] ॥81॥ इति पक्षवञ्चितः ।

तावेव च परावृत्तौ पक्षप्रद्योतकौ मतौ ॥82॥ इति पक्षप्रद्योतकः ।

त्रिपताकौ पताकौ वा नितम्बस्थावधोमुखौ ।
कूर्परौ कुञ्चितौ किञ्चित् करौ गरुडपक्षकौ ॥83॥ इति गरुडपक्षः ।

हंसपक्षौ यदा हस्तौ व्यावृत्तपरिव[10]र्तितौ ।
प्रसारितौ भु[11]जौ स्वस्मिन् दण्डपक्षावुदाहृतौ ॥84॥ इति दण्डपक्षः ।

हस्तावरालनामाना[12]वूर्ध्वदेशविवर्तिनौ ।
आवृत्ति-परिवृत्तिभ्यामूर्ध्वमण्डलिनौ मतौ ॥85॥ इति ऊर्ध्वमण्डली ।

---

[1] M.ज्ञौ ।
[2] M.विष्पा ।
[3] M.त्य ।
[4] M.हं ।
[5] M.नृ ।
[6] M.श्व ।
[7] M.स्ते ।
[8] M.रं ।
[9] M.धौ ।
[10] M.की ।
[11] M.स्वभु ।
[12] M.सादा ।

In Public domain. Digitization Muthulakshmi Research Academy

तथा च पार्श्वविन्यस्तौ पार्श्वमण्डलिनाविमौ ॥86।। इतिपार्श्वमण्डली ।

एक उद्वेष्टितो[1] [हस्तो]द्वितीयोऽप्यववे[2]ष्टितः ।
वक्षःसमानविक्षिप्तावुरोमण्डलिनौ करौ ॥87।। इति उरोमण्डली।

अलपल्लवकारालावुरःपार्श्वात[3]रस्थितौ ।
पूर्ववद् भ्रमितौ हस्तावुरःपार्श्वार्धमण्डलौ ॥88।। इति उरःपार्श्वार्धमण्डली

मणिबन्धसमीपस्थौ स्वस्तिकाकारधारिणौ ।
खटकावदनौ हस्तौ स्वस्तिकः स्वस्तिकामणौ[4]॥89॥ इति मुष्टिकस्वस्तिकम्।

व्यावृत्त[5]परिवृत्तौ[6] च पद्म कोशाभिधौ करौ ।
स्यातां जानुसमीपस्थौ नलि[7]नीपद्मकोशकौ ॥90॥ इति नलिनीपद्मकोशः।

पल्लवाख्यौ[8]शिरस्थाने हस्तौ ललितसंज्ञकौ ॥91॥ इति ललितः ।

मुष्टिक[9] स्वस्तिकौ हस्तौ शिरोदेशविवर्तितौ ।
उक्तौ बलित[10] नामानौ नृत्यविद्याविशारदैः[11] ॥92 ॥ इति बलितः ।

करौ प्रसारिताबूर्ध्वाव[12]लपद्मसमाह्वयौ। इति अलपद्मौ ।
उद्विष्टाग्रौ(?) विज्ञेयौ नृत्यज्ञ रुल्वणाभिधौ ॥93॥
इति उल्वणः । इति त्रिंशन्नृ[13]त्यहस्ताः ।

---

[1] M.तौ ।
[2] M.चे ।
[3] M.श्वीति ।
[4] मुष्टिवस्यस्तिकौ इत्युरेगे। इमौ चाक्रमेणा तक्षितौ उद्देशकथने केशबन्धात् परमनयोर्निर्देशो दृश्यते। द्वानतितमश्लोकेऽप्यादर्शे स्वस्तिकस्वस्तिकाविति पाठः। तेनात्र स्वस्तिकस्वस्तिका-विभौ इति भवेत्।
[5] M.त्य ।
[6] M.त्ता ।
[7] M.ल ।
[8] M.वप्पौ ।
[9] M.स्वस्तिक ।
[10] M.वालिप्त ।
[11] M.दौ ।
[12] M.म ।
[13] M.नृ ।

In Public domain. Digitization Muthulakshmi Research Academy

अथ कटी[1]भेदाः ।

कम्पितोद्वाहिता छिन्ना विवृत्ता रेचिता तथा ।
कटी पञ्चविधेत्यु[2]क्ता तल्लुक्ष्म[3] व्याहरेऽधुना ॥94॥

द्रुतं गता[ग]ते पार्श्वे दधती कम्पिता मता ॥95॥ इति कम्पिता ।

शनैरुच्चलिता पार्श्वद्वयेनोद्वाहिता कटी ॥96॥ इति उद्वाहिता कटी

छिन्ना तिर्यङ्मुखे पात्रे मध्यस्य बलनात् कटी ॥97॥ इति छिन्ना ।

X X X x इति विवृत्ता कटी
सर्वतो भ्रमणादुक्ता रेचिता भ्रमणे भवेत् ॥98॥ इति रेचिता कटी।

इति पञ्चविधा कटी ।

[अथ चरणभेदाः]

समोऽञ्चितः कुञ्चितश्च सूच्यग्रतलसञ्चरौ[4] ।
उद् घटित[5]श्चेति मुने षड्विधाश्चरणा[6] मता:[7] ।।
स्वभावेन स्थितो भूमौ समपादोऽभिधीयते ॥ 99॥ इति समः ।

भूस्थपार्ष्णिसमुतक्षिप्ताग्रतलप्रसृताङ्गुलिः ।
अञ्चितः स भवेत् पादोत्[8] प्लुति भ्रमणकादिषु ॥100।। इति अञ्चितः।

कुञ्चिताङ्गुलिरुत्क्षिप्तपार्ष्णिर्मध्ये च कुञ्चितः ।
कुञ्चितः स तदोद्दिष्टः[9] क्रमे तुङ्गस्य च ग्रहे ॥101 ॥ इति कुञ्चितः

---

[1] M.ट ।
[2] M.यु ।
[3] M.लक्ष्मा ।
[4] M.रा ।
[5] N.S.उद् घट्टितः ।
[6] M.णे ।
[7] M.तः ।
[8] M.दौ । पादः इति भवेत् ।
[9] M.तदादिष्टमं ।

In Public domain. Digitization Muthulakshmi Research Academy

वामः स्वाभाविको न्यस्तभूम्यङ्गुष्ठोऽग्रसंस्थितः ।
उतक्षिप्तेस्ताङ्गो (?) सौ सूची नूपुरबन्धने ।।102।। इति सूचीचरणः

यस्योत् क्षिप्ता भवेत् पार्ष्णिरङ्गुष्ठः प्रसृतस्तथा ।
अङ्गुल्यन्या[1]ऽञ्चिता स स्यात् पादोऽग्रतलसञ्चरः ॥103॥ इति अग्रतलसञ्चरः।

यदि पादतलाग्रेण स्थित्वा भूमौ निपत्यते ।
अस[कृ]द्वा सकृत् पार्ष्णिर्भवेदु द् घटितस्तदा ॥104॥
इति उद् घटितः । इति षड्विधचरणाः ।

अथ चारी

चरणैकेन चारी[2] स्यात् करणन्त [द्] द्वयेन च ।
त्रिभिश्च करणैः खण्डो मण्डलञ्च त्रिखण्डकैः ॥105॥

[चारीभेदाः]

चारी द्विधेति विज्ञेया भौमी चाऽऽकाशिकी परा ।
देशी-मार्गीविभेदेन चतुःषष्टिरितीरिता ॥106॥

[तत्र देशीषु भौम्यश्चार्थः]

समपादौ समनखौ निरन्तरतया[3] स्थितौ ।
स्थानेन समपादेन समपादा तदोदिता ॥107 ॥ इति समपादा ।

स्थितावर्ता च चरणं चरणान्तरमागतम् ।
गत्वाऽग्रतलसञ्चारे विश्लिष्टं पार्श्वसंस्थितम्॥108॥ इति स्थितावर्ता

यदाऽग्रतलसञ्चारं प्राग्देशोद्धृत्र यत्र च (?) ।
श[4] कटास्या तदा चारी श[5]कटास्येव निर्मिता ॥109।। इति शकटास्या ।

---

[1] M.लान्यं ।
[2] M.लो ।
[3] M.तदा ।
[4] M.स ।
[5] M.सं ।

In Public domain. Digitization Muthulakshmi Research Academy

भूमिं-निकुट्टयेत् सा तु[1] विच्यचा[2] कथिता बुधैः ॥110।। इति विच्यचा ।

चरणो स्वस्वपानर्श्वन स्वं स्वं पार्श्वमुपागतौ ।
मास[3] तालान्तरेणैव भवेदध्यर्धिका तदा॥ १११॥ इति अध्यर्धिका ।

तालमात्रं पुरो गत्वा द्वितालं पृष्ठमागतः ।
दक्षवामाङ्घ्रिणा किञ्चिदपसृत्यापसर्पणैः ॥
चारी चाषगतिः प्रोक्ता किञ्चिदुल्काति[4] पूर्विका ।112।। इति चाषगतिः।

किञ्चिदुत्प्लुत्य चरणौ यत्राग्रतलसंत्तरौ ।
पर्यायेण निपततः[5] सैलकाक्रीडिता मता ॥113॥ इति एलकाक्रीडिता

अङ्ख्रे[6] रल्पा[7]न्तरे न्यस्य पादा[8]ग्रे तलसञ्चरे ।
जङ्घायां स्वस्तिकं कृत्वाऽपसृत्त[9] श्चापसर्पणैः[10] ।
समोसटितमत्ताली[11] चारी स्यान्मध्यमे मदे ॥114।। इतिसमोसरितमत्तली

जङ्घास्वस्तिकसंयुक्तौ पादौ तिर्यञ्च(?)गामिनौ ।
घूर्णश्चोपसृतः सा[12] स्यान्मत्तली तरु[13]णे मदे ॥115॥ इति मत्तली।

समाङ्घ्रे [14]रग्रपृष्ठाभ्यामन्योग्रतलसञ्चरः ।
निघृष्टचरणो यत्र क्रमात्तामडितां[1] विदुः ॥116॥ इति अडिता

---

[1] M तां तु ।
[2] N.S. विध्यवाचा, विध्यवाक् ।
[3] M.र्च ।
[4] दुत्प्लुति इति स्यात् ।
[5] M.पर्यासो निपतिः ।
[6] M.न्ये ।
[7] M.ल्प् ।
[8] M.द ।
[9] M.श्ट ।
[10] M. णेम् ।
[11] N.S.समोत्तारितमत्तल्ली, समोत् सारितमत्तल्ली इति वा ।
[12] M.स्या ।
[13] M.न ।
[14] M.ग्रे ।

In Public domain. Digitization Muthulakshmi Research Academy

निषण्णोरुसमो वामो दक्षिणस्तु प्रसारितः ।
चाण(?)तालान्तरे तिर्यग् यस्यां सा स्यन्दिता स्मृता ॥117। इति स्यन्दिता ।

चरण चारविपर्यासात् सैवाप[2]स्यन्दिता मता ॥118।। इति अपस्यन्दिता

ऊरुयुग्मस्य चलनं जङ्घास्वस्तिकसंयुतम् ।
सा बद्धाऽभि[3]हिता चा[4]री पादाग्रे मण्डलभ्रमः ॥119॥ इति बद्धा ।

वक्षसि मुष्टि[5]हस्तोऽन्यो यथाशो[6]भं तथा भवेत् ।
पादोऽग्रतलसञ्चारी[7] चारी स्याज्जनिता मता[8] ॥120।। इति जनिता

अन्योन्यपादजनितः पार्ष्णिपादाग्रसञ्चरः ।
विपर्यासं यदा कृत्वा ऊरूद्धृत्ता तदोदिता ॥121॥ इति ऊरूद्धृत्ता

।। इति भौमचार्यः।।

॥ अथ आकाशचार्यः ॥

किञ्चित् प्रसार्य चोत् क्षिप्य गुल्यो (?) न्याङ्घ्रौ[9] निपातयेत् ।
तोलान्तरचतुष्केण अतिक्रान्ता प्रकीर्तिता[10] ॥122।। इति अतिक्रान्ता ।

चारीबद्धा[11] विधेयादावुद्धृत्याङ्घ्रिञ्च कुञ्चितम् ।
पार्श्वे निकुट्टयेच्चा[12]री ह्य[13]पक्रान्ता तदोदिता ॥123।। इति अपक्रान्ता ।

---

[1] M.अड्डिता ।
[2] M.य ।
[3] M.धाग ।
[4] M.च ।
[5] M.ष्टि ।
[6] M.सो ।
[7] M.रो ।
[8] M.तः ।
[9] M.ह्वें ।
[10] M.मकीतनम् ।
[11] M.ध्वा ।
[12] M.चा ।
[13] M.म ।

In Public domain. Digitization Muthulakshmi Research Academy

नितम्बक्षेत्रपर्यन्तं स्वादि (?) चरणकुञ्चितम् ।
पार्ष्णी[1]चेत् पातयेद् भूमौ पार्श्वक्रान्ता तदा भवेत्॥ 124॥ इति पार्वक्रान्ता ।

वक्रं चरणमुत्क्षिप्योत् प्लुत्य[2] भूमौ निपातितम् ।
तदा मृगप्लुता चारी अन्याङ्घ्रि रेव[3]मेव चेत् ॥125।। इति मृगप्लुता ।।

वक्रितो [त्] क्षिप्तचरणो जानु स्तन[4] समं भवेत् ।
स्तब्धी[5]कृतोऽग्रचरणो ऊर्ध्वजानुस्त्[6] दादिशेत् ॥126।। इति ऊर्ध्वजानु[:]

पश्चात्[7] प्रसारिताङ्घ्रि[8] श्चेदन्योन्या[9] भिमुखं तलम् ।
पार्ष्णि(:)कृता [10]स्वपार्श्वे भृत्यस्ताऽला[ता] तदा स्मृता॥ 127॥ इति अलाता।

वक्रितो (त्) क्षिप्तचरणं प्रसार्याग्रे च पातयेत् ।
सूची चारीति विज्ञेया तज् ज्ञैश्चातिमनोहरा ॥128॥ इति सूची ।

वक्रि[11]चरणं पृष्ठे नीत्वा पार्श्वस्फि[12]जं स्पृशेत् । 1
पश्चाद्दग (?) तले भूमौ सोक्ता नूपुरपादिका ॥129।। इति नूपुरपादिका ।

वक्रि[13] तं चरणं[14] धृत्वा[15] दोलयित्वा च पार्श्वयोः ।
दोलापादा तदा चारी द्वितीयमेवमेव चेत् ॥130॥ इति दोलापादा

---

[1] M.पार्ष्णा ।
[2] M.मुच्छिप्ते प्रत्यु ।
[3] एव ।
[4] M.नु ।
[5] M.द्वो ।
[6] M.न्त ।
[7] M.श्चां ।
[8] M.ग्रे ।
[9] M.बा ।
[10] M.त्वा ।
[11] M.त्य ।
[12] M.ता ।
[13] M.कृ ।
[14] M.णो ।
[15] M.त्य ।

In Public domain. Digitization Muthulakshmi Research Academy

चरणौ नूपुरौ न्यस्य अग्रे[1] शीघ्र प्रसार्य च ।
स्वदेहाभिमुखं चारी दण्डपादा[2] तदा स्मृता ॥131।। इति दण्डपादा ।

पृष्ठतो वलितं [3]सृष्टा शिरो भ्रान्ता (?) च सर्वतः ।
पृष्ठतश्चरणो यत्र विद्युद् भ्रान्ता भवेदसौ ॥132॥ इति विद्युद् भ्रान्ता

अतिक्रान्तगतं पादं त्रासस्योरोविवर्तनम् ।
कृत्वा पादान्त [4]गतलभ्रमणे भ्रमरी मता[5] ॥133॥ इति भ्रमरी।

पार्ष्णिमूलेऽन्यपादाग्रं कृत्वा त्रिकविवर्तनम् ।
भुजङ्गत्रासिता सा स्यात् कुर्याज्जानु स्वपार्श्वगम् ॥134।। इति भुजङ्गलासित

लता[6] हस्तकरोत् क्षिप्तं[7]वक्रितं चरणं नयेत् ।
पार्श्वान्तरं ततो जङ्घां स्वस्तिकीकृत्य पातयेत्[8] ॥135।। इति आक्षिप्ता

विलिष्टजङ्घयोः[9] कृत्वा स्त्रस्तिकन्तस्य कुञ्चितः ।
पादः प्रसारितो वक्रः स्वपार्श्वस्थोपयातयोः[10] ।
पार्ष्ण्यां पार्ष्णिक्षरक्षेत्रे यत्राविद्धा[11] भवत्यस्यौ ॥136।। इति आविद्धा[12] ।

आविद्धापादमन्योन्यप्रदेशस्थानपार्ष्णिकम् ।
कृत्वोत् प्लुत्य भ्रमरकं यत्वा (?) यत्र निपातयेत् ।
तथान्यं पादमुद्धृत्य सोद्धृता चारिका स्मृता ॥137॥ इति उद्धृता

[इति आकाशचार्यः]

इति मार्गचार्यः[13]

---

[1] M.म ।
[2] M.तं ।
[3] M.त ।
[4] M.ल ।
[5] M.नः ।
[6] M.तां ।
[7] M.प्त ।
[8] M.यो । अत्र कोऽप्यं शब्त्रुटि इव भाति ।
[9] M.यो ।
[10] M.यो ।
[11] M.धा ।
[12] M.रुद्धा ।
[13] M.र्या ।

In Public domain. Digitization Muthulakshmi Research Academy

अथ देशीचार्यः[1] ॥ [तत्र भौम्यः]

स्थित्वा स्वस्तिकबन्धेन पार्ष्ण्यो प्रपदयोस्तथा ।
रेचितौ चरणौ यत्र सोक्ता नूपुरविधिका ॥138।। इति नूपुरविधिका ।

वर्धमाने स्थितौ स्थाने वामदक्षिणतस्तथा[2] ।
सरतोऽद्भुतमानेन पादौ तिर्यङ्मुखा तदा ॥139।। इति तिर्यङ्मुखा चारी।

नन्द्यावर्तौ स्थितौ पार्ष्णिपादाग्रेरेचितौ पुनः ।
[पुनः] प्रसारितौ यस्य सामराला (?) विधीयते ।
नन्द्यावर्तस्थयोरङ्घ्र्यो[3]स्तिर्यक्सृत्या कुलीरिका ॥140।। इति कुलीरिका

जङ्घावर्तस्थपादाभ्यां पश्चात् सृत्या तु कातरी[4] ॥141।। इति कातरी ।

कुञ्चिते स्वस्तिकीकृत्य[5] वलितान्ते तले यदा ।
अल्पमुतप्लुत्य [6]निपतेद्ध[7] रिणवासिको[8] दिता ॥142।। इति हरिण त्रासिका

भूमिं धृष्ट्वा वहिर्नी[9]त्वा व्यावर्तेते[10] शनैः क्रमात् ।
चरणौ यत्र तामाहुरर्धं[11] मण्डलिकां बुधाः[12] ॥143।। इति अर्धमण्डलिका

इतश्चेतश्च चरणौ स्थापयेन्न विशे [त] स्थले[13]।
मत्तवद् यत्र तामाहुश्चारीं[1] धीरा मदालसाम्[2] ॥144।। इति मदालसा

---

[1] M.इति ।
[2] M.तोत ।
[3] M.धो ।
[4] M.र ।
[5] M.त्वा ।
[6] M.प्लोत् षु ।
[7] M.ध ।
[8] M.का ।
[9] M.न्री ।
[10] M.व्यावृत्तते ।
[11] M.र्थ ।
[12] M.धः ।
[13] M.स्ति।

In Public domain. Digitization Muthulakshmi Research Academy

स्फुटिताऽग्रे सृतौ वेगाद्भूस्पृशोः[3] पादपार्श्वयोः ॥145।। इति स्फुटिता

धरण्यां चरणाघातः पुत्ता (?) निगद्यते ॥146॥ इति पुत्ता ।

चरणः[4] स्वस्तिकाकारः कारितः[5] स्वस्तिका भवेत् ॥147।।इति स्वस्तिका

निकुट्टना[6]न्मिथोऽङ्घ्रि भ्यामुद्धृताभ्यां पुराटिका ॥148।। इति पुराटिका ।

चरणोऽग्रे सरत्ये कों[7] यत्र सा सारिका बता ॥ 149॥ इति सारिका

पुरःसरणमङ्घ्रिभ्यां समाभ्यां स्फुरिता भवेत् ॥150।। इति स्फुरिका(?) ।

यश्चान्यस्य पुरस्तं[8] च प्रसार्य चरणं यदि ।
निकुट्टयेद् भवेत्तेन[9] लताक्षेपा तु[10] दोलिता ॥151॥ इति लताक्षेपा

एकपादे स्थितः स्थाने भूस्थेन चरणेन चेत् ।
ऊरू[11] ताडयति प्रोक्ता तदा चार्यूरुता [12]डिता ॥152।। इति ऊरुताडिता[13]

इति देशीभौम्यश्चार्यः[14] ॥

अथा[15] काशिक्यः ॥

यस्यां पुरोऽङ्घ्रिमुतक्षिप्य ललाटस्योपरि द्रुतम् ।
भ्रान्तयित्वा तु विन्यस्येद्विद्युद्भ्रान्ता तदादिशेत् ॥153।। इति विद्युद्भ्रान्ता

---

[1] M.री ।
[2] M.ता ।
[3] M.शो ।
[4] M.ण ।
[5] M.त ।
[6] M.द्दना ।
[7] M.त्योक्लो ।
[8] M.पश्चान्नयस्य पुरस्स्य इति भवेद्वा ।
[9] M.वं तेन ।
[10] M पस्तु ।
[11] M.उत्तू ।
[12] M.र्यानुत्ता ।
[13] M.उरूता ।
[14] M.माचार्या ।
[15] M.अथ ।

In Public domain. Digitization Muthulakshmi Research Academy

ताताङ्घ्रे [1]रुत् प्लुत्याभीक्ष्णं निपाताद्ध [2]रिणप्लुता ॥154।। इति हरिणप्लुता

डमरी[3]कुञ्चितस्थाये(?) वामदक्षिणतो भ्रमात् ॥155॥ इति डमरी

यत्र स्वस्तिकमासृत्य[4] प्रक्षिपेत्ति [5]र्यगूर्ध्वतः ।
चरणौ दण्डपादा सा चारी तज्ज्ञैः प्रकीर्तिता[6] ॥156।। इति दण्डपादा

ऊरौ पार्श्वेन विन्यस्य पादं[7] यत्र प्रसारयेत् ।
तीक्ष्णं ग्रीवा(?) कृत्य नाम सूची चारी प्रकीर्तिता[8] ॥157।। इति सूची ।

कुञ्चिताकुञ्चितं पादमङ्घ्रिणाऽन्येन लङ्घयेत् ।
गगनं चेत्तदा[9]चारी जङ्घालङ्घनिका मता ॥158।। इति जङ्घालङ्घनिका

अङ्घ्रिं[10] कुञ्चितमुत् क्षिप्य पुरो विस्तीर्य वेगतः ।
विन्यसेदवनौ यत्र पुरः[11]क्षेपा तदा भवेत् ॥159।। इति पुरः[12] क्षेपा ।

वाह्यपार्श्वेन यत्रोर्ग(?) पृष्ठपृच्छेन(?) यत् पदम्।
नितम्बनिकटे याति साऽपक्षेपा प्रकीर्तिता ॥160॥ इति अपक्षेपा ।

पुरोगगनभागे च प्रसार्य चरणं मुहुः ।
आकुञ्चयेत्तदा चारी विक्षेपा सा प्रकीर्तिता ॥161 ॥ इति विक्षेपा ।

आ[कु]ञ्चि[13]तस्य पादस्य पुरतः पृष्ठतस्तथा ।
उत्क्षेपो[14] जानुपर्यन्तमुत्क्षेपा[1] कथ्यते बुधैः ॥162॥ इति [उत्]क्षेपा[2]

---

[1] M.ताताग्रे ।
[2] M.ध ।
[3] M.र्या ।
[4] M.ष्ठत्य ।
[5] M.प्रोक्षिपे हि ।
[6] M.तः ।
[7] M.द ।
[8] M.तः ।
[9] M.गगणयेत् तेतदा ।
[10] M.ङ्घ्रि
[11] M.र ।
[12] M.र ।
[13] M.चि ।
[14] M.उपक्षो ।

In Public domain. Digitization Muthulakshmi Research Academy

अङ्घ्रिणैकेन चेदन्यं वेष्टयेद्वेष्टनं तदा ॥163॥ इति वेष्टनम् ।

स चेत् पृष्ठे नयेत् पादौ पृष्ठो[त्]क्षेपमिमं विदुः ॥।। पृष्ठो[त्]क्षेपः ।
उल्लोला[3] स्याच्चरणयोः क्रमेण लोलनाद्भुवि।।164।। इति उल्लोला

ललिता वनितामूर्तिरु[4]द्धृतश्चरणो भवेत् ।
यत्र[त]त् प्रा[5]वृतं ज्ञेयं मकरध्वजजीवनम् ॥165॥ इति प्रावृतम् ।

पादयोः स्वस्तिकस्यैक (:) कुञ्चितो दोलितः परः ।
कुञ्चितश्चरणो[6] यत्र सा विद्धा[7] बोध्यते बुधैः ॥166।। इति विद्धा[8]

इत्याकाशिक्य[:] ॥ इति देशीचार्यः ॥

[अथ स्थानकानि]

स्थानकान्यथ वक्ष्यामि स्त्रीपुंस संज्ञितानि च ।
चत्वारि स्त्रीकृतानि स्युर्नरेषु रस कीर्तिताः ॥167॥

[पुरुषस्थानकानि]

समपादं च वैशाखं मण्डलं वैष्णवं तथा ।
आलीढ-प्रत्यालीढे तु एते षट् पुरुषेषु च ॥168॥

एकतालान्तरौ पादौ समौ सौष्ठवसंयुतौ ।
समपादं तदेव स्यात् स्थानं स्थानविदो विदुः ॥169।। इति समपादम्[9] ।

एकपादः समस्थितस्त्रपस्त्रश्चाव [1]स्थितोऽपरः ।

---

[1] M.पः ।
[2] M.पः ।
[3] M.उलाल ।
[4] M.उ ।
[5] M.प्र ।
[6] M.णौ ।
[7] M.धा ।
[8] M.धा ।
[9] M.दः ।

In Public domain. Digitization Muthulakshmi Research Academy

सार्धं द्वै तारिता[2] जङ्घा किञ्चिन्नता[3] भवेत् ।
सौष्ठवं यत्र विज्ञेयं वैष्णवं स्थानकं परम् ॥170॥ इति वैष्णवम्[4] ।

भूमेरूर्ध्वनिपण्णौ[5] चेत् सार्धतालत्रया[6]न्तरे ।
यदा त्र्यस्त्रौ चरणयोस्तदा वैशाखकं[7] स्मृतम्[8] ॥171॥ इति वैशाखम् ।

पक्षस्थौ चरणौ त्र्यस्त्रावेक[9] तालान्तरौ भुवि ।
कटिजानू[10]समौ[11]ज्ञेयौ मण्डलं तद्[12]विदुर्बुधाः ॥172॥ इति मण्डलस्थाकम् ।

वामो[13]यत्र निषण्णस्तु[14]रिच्यते पूर्वमानतः ।
दक्षिणश्चरणश्चाग्रे पञ्चताला[न्]प्रसारितः ॥
अद्धावपितं (?) विद्यादालीढं स्थानकं परम् ॥173॥ इत्यालीढम् ।

आलीढाङ्गविपर्यास[:] प्रत्यालीढमुदीरितम् ॥174॥ इति प्रत्यालीढम् ।

इति षट् पुरुषस्थानकानि ॥

[अथ स्त्रीस्थानकानि]

वामस्तालान्तरस्त्रपस्त्रो दक्षिणश्चरण[:] समः ।
प्रसन्न वदनं वक्षः समुन्नतं[15]कटी नता ॥175॥

---

[1] M.अश्रश्चो
[2] M.सार्धद्वितालांतरिता इति भवेत् ।
[3] M.तना ।
[4] M.वः ।
[5] M.णौ ।
[6] M.वया ।
[7] M.का ।
[8] M.ताम ।
[9] M.श्र एक ।
[10] M.नु ।
[11] M.मो ।
[12] M.मे ।
[13] M.तं ।
[14] M.मे ।
[15] M.णोतु ।

In Public domain. Digitization Muthulakshmi Research Academy

कटीनितम्बगो हस्तो दक्षिणोऽन्यो[1] लताकरः ।
यत्राऽऽयतं तदा स्था[2]नं कामभावप्रकाशकम् ॥176।। इति आयतम् ।

अवहित्थं तदेव स्याद्विपर्यासेन यत्[3] कृतम् ॥177।। इति अवहित्यम्[4] ।

सम[5]स्यैकस्य पादस्य पार्ष्णिदेशगतोऽपरः ।
सूचीपादे स्वपार्श्वौ वा समस्तालान्तरे[6] स्थितः ।
अश्वावरोहणारम्भे[7] तदश्वा[8] क्रान्तमिष्यते ॥178।। इति अश्वाक्रान्तम्[9]

गत्युन्मुखा[10] च यत्रैकं पादमुद्धृत्य नर्तकी ।
उदास्ते तद्गते स्थित्यौ निरोधास्यागताद्गती[11] ॥179।। इति गतागतम् ।

इति स्त्रीस्थानकानि ॥

[अथ देशीस्थानकानि]

स्वस्तिकौ हंसकस्थाने चरणौ कुञ्चितौ यदा ।
मिथ[:] श्लिष्टकनिष्ठौ च तदाहु[:] स्वस्तिकं बुधाः ॥180।।इति स्वस्तिकम्।

वर्धमाने तु चरणौ तिर्यञ्चौ पार्ष्णिसङ्गतौ । इति वर्धमानम्[12] ॥
अस्यैव चेच्चरणयोरन्तरं[13] स्या[द्]यदा[14]ङ्गुलम् ।
वितस्तिमात्रमथवा[नन्द्याव]र्तैस्तदोदितः[1] ॥181॥इति नन्द्यावर्तः।

---

[1] M.स्यो ।
[2] M.ष्मा ।
[3] M.ज ।
[4] M.त्थ ।
[5] M.मे ।
[6] M.रो ।
[7] M.म्भो ।
[8] M.स्यां ।
[9] M न्ता ।
[10] M.खां ।
[11] M.तद्गतिस्थित्योर्निरोधः स्याद् गतागतम् इति भवेत् ।
[12] M.नः ।
[13] M.र ।
[14] M.पद ।

In Public domain. Digitization Muthulakshmi Research Academy

समस्या[2]ङ्घ्रेर्जा[3]नुमूर्ध्नि वाह्यपार्श्वे यदान्तरम् ।
वाह्यपार्श्वे त[4]लस्थोऽङ्घ्रि रेकपादं[5] तदोच्यते ॥182॥ इति एकपादम्

नन्द्यावर्तस्य चेदङ्घ्र योर्भवे[6]दष्टादशाङ्गुलम् ।
अन्तरं चतुरं स्थानं चतुरस्रं तदोदितम् ॥ 183॥ इति चतुरस्रम् ।

पार्ष्णिजङ्घे[7] तु संलग्ने[8] धरणी चरणौ यदा ।
तिर्यक् प्रसारितौ[स्या] तां सम[9] सूचि तोच्यते ॥184।। इति समसूचि ।

सूचीपादौ कृतौ यत्र पुरः पश्चात् प्रसारितौ[10] ।
युगपद्वदितं तज्ज्ञैः स्थानं विषमसूचिकम्[11] ॥185।। इति विषमसूचि

एकोऽङ्घ्रि [:] कुञ्चितोऽन्यस्तु भूस[12] लग्नोऽनुपार्ष्णिक [:]
तिर्यक् प्रसारितो यत्र खण्ड [13]सूचि तदोच्यते ॥186।। इति खण्डसूचि ।

दक्षिणश्चरणो जानुवाह्यगुल्फवि [14]लक्षितः ।
वामः [15]समो भवेद्यत कूर्मा[16] सनमतो[17] विदुः ॥187।। इति कूर्मासनम् ।

---

[1] M.तम् ।
[2] M.म्य ।
[3] M.जा ।
[4] M.न ।
[5] M.द ।
[6] M.भरे ।
[7] M.ङ्घौ ।
[8] M.ग्नौ ।
[9] M मं ।
[10] M तैः ।
[11] M तम् ।
[12] M सह ।
[13] M खण्ड ।
[14] M मि ।
[15] M सा ।
[16] M र्या ।
[17] M नत्तो ।

In Public domain. Digitization Muthulakshmi Research Academy

विषुणे (?) संयुते वाम जानुनी संस्थिते क्षितौ ।
वृषभासनमाख्यातं सौष्ठ[1]वाधिष्ठितं तदा ॥188।। इति वृषभासनम्[2] ।

इति देशीस्थानकानि ।।

अथ [3]करणानि ।।

नर्त[4] को नर्त[5]नारम्भे समपादौ लताकरौ ।
कृत्वाऽङ्गं[6] चतुरस्रं च तदन्ते नृत्यमाचरेत् ॥189॥

पादो दक्षिणनिष्कामान् (?)
तथैव वामपार्श्वे च हस्तौ पुष्पपुटः (?) ।
तल[7]पुष्पपुट तस्मात् करणं प्रथ[मं] मतम्[8] ॥190॥ इति तलपुष्पपुटम् ।

ऊर्ध्वमण्ड[9]लिनौ हस्तौ कृत्वा हस्तोत्थिताञ्जलिः[10] ।
निहञ्चितांस[11] ग्रीवा न लीनं तत् करणं मतम् ॥191।। इति लीनम् ।

वामदक्षकराङ्घ्री[12] च पार्श्वे निष्कृष्यमानयोः (१)
उतप्लुत्य युगपद् यत्र हस्ताङ्घ्रि [:] स्वस्तिकः कृतः ।
तत् स्वस्तिकमिति प्राहु [:] करणं पूर्वसूरिभिः ॥192।। इति स्वस्तिकम् ।

खटकामुखवामस्थः[13] करिहस्तस्तु[14] दक्षिणः ।
पाउ स्वस्तिकां कृत्य[1] तदर्धस्वस्तिकं मतम् ॥193।। इति अर्धस्वस्तिकम्

---

[1] M सोष्ण ।
[2] M नः ।
[3] M का ।
[4] M.त्ते ।
[5] M.त्ते ।
[6] M.गं ।
[7] M.ल्प ।
[8] M.न ।
[9] M.ण्डि ।
[10] M.जलिः ।
[11] M.श ।
[12] M.ध्री ।
[13] M.नस्था ।
[14] M.सु ।

In Public domain. Digitization Muthulakshmi Research Academy

अग्रत [:] पार्श्वयोः पृष्ठे कराङ्घ्री[2] स्वस्तिकीकृतौ ।
त[द]दिक् स्वस्तिकमुद्दिष्टं त[ज्]ज्ञैर्नयनसुन्दरम् ॥194॥इति दिक्स्वस्तिकम् ।

समपादं भुवि स्थित्वा किञ्चिदुत् प्लुति[3] पूर्वकम् ।
करौ व्यावृत्तपद्मत्वं धत्ते स्या[4] दञ्चितं तदा ॥195॥ इति अञ्चितम्

तदेवैकाङ्घ्रि [5]रचितमेकपादाञ्चितं[6] मतम् ॥196।। इति एकपादाञ्चि[7]तम्

उपरिष्टेन जङ्घायां तदन्यचरणस्थितौ ।
तप्ते (?) ततकृते यत्र तद्भवेद्भैरवाञ्चितम्[8] ॥197।। इति भैरवाञ्चितम्[9]

चर्यो विद्धाऽञ्चितः पाद [:] पर्यायाद् रचितः करः ।
यत्रोन्मत्तं तु तद् गर्वे सौभाग्यादि [10]समुद्भवे ॥198॥ इति उन्मत्तम्

उरगत्रासितां चारीं[11] कृत्वोत्क्षि[12]प्याङ्घ्रिकुञ्चितम् ।
ऊरू जानू कटी त्रयस्त्रं यत्र यत्र विवर्तये [त्] ।
एको दोलाकरश्चान्यः[13] खटकोरगत्रासिकम् ॥199।। इति भुजङ्गत्रासितम्

आ[14] दौ तु[15] डमरी चारी ततो नूपुरपादिका[16] ।

---

[1] M.पादौ तु स्वतिकीकृत्य इति स्यात् ।
[2] M.रोघ्री ।
[3] M.दुल्लृनि ।
[4] M.स्य ।
[5] M.अघ ।
[6] M.श्चि ।
[7] M.श्चि ।
[8] M.श्चि ।
[9] Mदप्तिप्त ।
[10] M.दिषु ।
[11] M.री ।
[12] M.त्तोक्षि ।
[13] M.श्चांन् प्र ।
[14] M.चा ।
[15] M.ड ।
[16] M.कम् ।

In Public domain. Digitization Muthulakshmi Research Academy

तडिकेनैव[1] तद्धस्तं रेचितञ्च ततः परम् ।
लताहस्तं यत्र कृतं [तन्] नूपुरमुदाहृतम् ॥200॥ इति नूपुरम् ।

हस्तिहस्तौ करौ पादपृष्ठे वृश्चिकपुच्छ[क]म् ।
सन्नत[2] दूरपृष्ठः च वृश्चिकं यत तद्[3] विदुः ॥201।। इति वृश्चिकम् ।

चरणं वृश्चिकं कृत्वा शीर्षे कृत्वाऽलपल्लवौ ।
चरणं तं निकुट्टेत[4] तदा वृश्चिककुट्टि[5]तम ॥202।। इति वृश्चिककुट्टि[6]तम्

वृश्चिकौ चरणौ कृत्वा करौ स्वस्तिकरेचितौ ।
किञ्चित्तु चलतो यत्र तदा वृश्चिकरेचितम् ॥203॥ इति वृश्चिकरे[7]चितम् ।

अङ्गि[8]तां प्रथमं कृत्वा दोलापादं ततो भवेत् ।
चक्रवद् भ्रमरी दत्ता[9] तदा स्याच्च[10] क्रमण्डलम् ॥204।। इति चक्रमण्डलम्

कृत्वा वद्धां[11] स्थितावर्तामु[12] रोमण्डलिनौ करौ ।
उरोमण्डलसंज्ञः तु करणं परिकीर्तितम ॥205।। इति उरोमण्डल[13]म् ।

अङ्गुष्ठो वृश्चिकाङ्केश्चे[14]ल्लला[15]टे तिलकं न्यसेत् ।
तदा ललाटतिलकं करणं परिकीर्तितम् ॥206।। इति ललाटतिलकम् ।

---

[1] M.कैने ।
[2] M.त्त ।
[3] M.त ।
[4] M.द्या ।
[5] M.पुढि ।
[6] M.घि ।
[7] M.चरणरे ।
[8] M.डि ।
[9] M.त्वा ।
[10] M.स्य च ।
[11] M.द्धा ।
[12] M.उ ।
[13] M.ल ।
[14] M.श्च।
[15] M.ल ।

In Public domain. Digitization Muthulakshmi Research Academy

व्यावृत्तिपरिवृत्ताभ्यां यत्र दोलाकरो[1] भवेत् ।
चारीं[2] चाषगतिं[3]कुर्यात्तदावृत्तं स्मृतं बुधैः ॥207।। इति आवृत्तम[4] ।

ऊर्ध्वज्ञानुर्य[5]दा चारी दोलापादा भवेदनु ।
करौ दोलौ तदा प्रोक्तं करणं दालसंज्ञितम् ॥208।। इति दोलापादः ।

श्रवणस्य करिकरो[6] दोलापादा यदा भवेत् ।
गजवद्विचरेद्भूमौ गजक्रीडितकं भवेत् ॥209॥ इति गजक्रीडितम्

पृष्ठेऽङ्घ्रिः प्रसृतो भूमिश्लिष्टाङ्गुष्ठौ लताकरौ ।
यदा तदा महापक्षिबुद्धे[7] गृध्रावलीनकम् ॥210।। इति गृध्रावलीनकम् ।

लताकरौ रेचितकौ वृश्चिकाङ्घ्रिः[8] समुन्नतम् ।
जठरं यत्र कुर्वन्ति करणं गरुडप्लुतम् ॥211॥ इति गरुडप्लुतम् ।

हरिणप्लुतया[9] चार्या[10] दोलाखटकहस्तकम् ।
हरिणप्लुतमाख्यातं ना[11]मोक्तविनियोगकम् ॥212।। इति हरिप्लुतम् ।

वृश्चिकाङ्घ्रि[12] प्रकुर्वीत हस्तावू[13] रौ च रेचि[14] तौ ।
भ्रमरी क्रियते पश्चान्मयूरललितं तदा ॥ 213॥ इति मयूरललितम्

---

[1] M.रौ ।
[2] M.रो ।
[3] M.ति ।
[4] M.वर्त ।
[5] M.य ।
[6] M.वरो ।
[7] S.R.युद्धे । footnote बद्धौ ।
[8] M.ङ्घ्रि।
[9] M.ता ।
[10] M.र्य ।
[11] M.न ।
[12] M.ङ्घिं ।
[13] M.दू ।
[14] M.रोखि ।

In Public domain. Digitization Muthulakshmi Research Academy

कृत्वा च नूपुरां चारीं दण्डपादान्त[1] दिक्क[2]रः ।
दण्डवत् क्रियते यत्र दण्डपादन्त[3]दोदित[4]म् ॥214।। इति दण्डपादम्[5] ।

ऊर्ध्वमण्डालनौ हस्तौ सूच्यङ्घ्रिर्ये[6]त्र बद्धया ।
विवृत्तो भ्रमरो कुर्यात् परिवृत्तं तदुच्यते ॥215॥ इति परिवृत्तम्[7] ।

पृष्ठतो भ्रमितं पादं सर्वतो मण्डलभ्रमः ।
भ्रमयेच्चेच्छिरः[8] क्षेत्रे विद्युद्भ्रान्तं तदु[9]च्यते ॥216।। इति विद्युद्भ्रान्तम् ।

पार्श्वाक्रान्ता भवेच्चारी करौ पादानुगौ नयेत् ।
पार्श्वकान्तस्तदा ज्ञेयोऽभिन[10]ये वीररौद्रके ॥217।। [इति पार्श्वक्रान्तः]

कुञ्चितो[त्]क्षिप्तचरणस्तदधः खटकामुखः ।
वक्षस्य[11]न्योऽलपद्म[:]स्याच्छीर्षे सूची च वि[12]स्मये॥218।इति सूचीकरणम्।

वधोपक्रान्तयो[13]श्चार्यौ[:] कृतयोर्ह[14]स्तयो[:] पुनः ।
तत्प्रयोगानुग]त]योरपक्रान्तमुदाहृतम् ॥219॥ इति अपक्रान्त[म्]

अधोमुखा[15]ङ्गुली हस्तौ पताकौ च शि[16]रस्थलम् ।
आ[1]नीय परिवर्तेत निष्क्रान्योङ्गीसयोश्चयोः(?)[2] ॥220॥

---

[1] M.त ।
[2] M.ष्क ।
[3] M.स्य ।
[4] M.तः ।
[5] M.दा ।
[6] M.य ।
[7] M.तः ।
[8] M. क्षिरः ।
[9] M.तोच्यु ।
[10] M.र ।
[11] M.स्थ ।
[12] M.दि ।
[13] M.योः ।
[14] M.ह ।
[15] M.खो ।
[16] M.स्थि ।

In Public domain. Digitization Muthulakshmi Research Academy

मिथो मुखावधि[3]स्थाप्य स्वदेहाभिमुखाङ्गुलि ।
नितम्बाख्यौ विधीयेते नितम्बकरणं तदा ॥221॥ इति नितम्बः ।

अलाताङ्घ्रिं पुरः कृत्वा द्रुतं स्थाप्य च टेटवत् (?) ।
तथैवान्यकराङ्घ्री च सिंहविक्रीडितं तदा ॥222।। इति सिंहविक्रीडितम्

कृता तु ज[4]निता चारी मुष्टिर्वक्षोलनाकरः ।
करणं जनितं नाम क्रियारम्भादि तद्भवेत् ॥223।। इति एलकाक्रीडितम्[5]

उरोदेशे च मलिनौ[6] करौ च खटकामुखौ ।
मण्डलस्थानके स्थित्वा स[7]न्निवेशमुदीरितम ।।224॥ इति निवेशः

एकौ हस्तो रेचितः स्याद वक्षस्य [8]न्योऽलपर्वतः ।
पार्श्वयोर्लोलितं शीर्षं वैष्णवस्थानके स्थितः ।
पर्श्वयोर्विश्रमेद यत्र करणं तच्च लोलितम ।।225॥ इति लोलितम्

पार्श्वेन भ्रमरी कृत्वा मण्डलस्थानके स्थितः ।
कृत्वा छिन्नां कटीमेकां वाह्वो [:] शिरसि पल्लवम् ॥226॥

करभ[9]ङ्गीतरेणैवं यत्र त्रिचतुरा[:]कृता[:] ।
आवृत्तय[:] कटीछिन्नं[10] तद्वि[11]स्मयनिरूपणे ॥227।। इति कटीछिन्नम् ।

---

[1] M.द्व ।
[2] M 220 संस्कृत चोक करणातरस्य न तु नितम्बसेयनुमीयते ।
[3] M.दा ।
[4] M.वः ।
[5] M. अत्र जनितमिति लेख्ये एलकाकीडिमिति यल्लिखितं तेनानुमीयते अत्र कश्चिद् ग्रन्थः
[6] M.च मलिनौ इत्यत्र मंडलिनौ इति भवेत् ।
[7] भरतागमे निवेशमिति पाठः तत्प्रामाष्ये पुष्पिकायां च निर्बन्धःश्चेदत्र तन्निवेश मितिपाठः कल्पनीयः ।
[8] M.स्यो ।
[9] M.म ।
[10] M.क्षिणं ।
[11] M.न वि ।

In Public domain. Digitization Muthulakshmi Research Academy

स्वस्तिकौ खलितौ पादो क्रमेण परिवाहिता ।
शिरोदोलो य[1]दा हस्तौ मद [2]स्खलितकं तदा ॥228।। इति मदस्खलितम्

कृत्वा मदप्लुतां चारी स्वस्तिकोऽङ्घ्रिस्तद् [3]ग्रतः ।
हस्तौ दोलौ सन्ततं[4] तत् दधना (?) पसृतौ भवेत् ॥229।। इति सन्ततम्

दोलापादेऽङ्घ्रिगमना[5] गमने[6] हंसपक्षकः ।
अङ्गान्तरेऽपि कुरुते स्खलितं तव प्रकीर्तितम् ॥230॥ इति स्खलितम्

चारीं कृत्वा ह्य[7]पक्रान्तामङ्घ्रिमग्रे प्रसारयेत् ।
हंसपक्षो यदा हस्तावतिक्रान्तस्तदोदितः[8] ॥231॥ इति अतिक्रान्तम्

शकटास्या[9]भवेच्चारी प्रसर्पि[10]णाङ्घ्रिणा सह ।
एको हस्तो द्वितीयस्तु व[11]क्षस्थः[12] खटकामुखः ।
यत्र तच्छकटास्यं[13] स्यात्तादृशे बालखेलने ॥232।। इति श[14]कटास्यम् ।

चारीं[15] कृत्वा अलाताख्यां[16] करौ कृत्वा तु रेचितौ ।
व्यावृत्ता[17]वलपद्मौ[18] च कुञ्चितौ बाहुशीर्षगौ ।
वृषभक्रीडितं तस्मात्तज्ज्ञैः प्रोक्तं मनोहरम् ॥233।। इति वृषभक्रीडितम् ।

---

[1] M.म ।
[2] M.द्य ।
[3] M.दा ।
[4] N.S.सन्नतं ।
[5] M.न ।
[6] M.ना ।
[7] M.म ।
[8] M.अत्र सर्वत्र क्लीवत्वमेव प्राकरणिकम् ।
[9] M.स्याद् इत्यधिकम् ।
[10] M.घसर्षि ।
[11] M.वे ।
[12] M.स्थो ।
[13] M.स्या ।
[14] M.मूले सर्वत्र दंत्यसकारः ।
[15] M.री ।
[16] M.अलतारु ।
[17] M.त्या ।
[18] M.कौ ।

In Public domain. Digitization Muthulakshmi Research Academy

समपादस्थितेरर्धं यत्र[1] त्रिकविवर्तितम्[2] ।
उत्प्लुत्य प[ति]तं तिर्यक् लोहरी करणञ्च तत् ॥234॥ इति लोहरी

इति करणानि ॥

अथाङ्गहारा लिख्यन्ते ॥

इदानीमङ्गहाराणां लक्षणं कथ्य[3]ते स्फुटम् ।
षड्भिः सप्तभिरष्टाभिर्नवभिर्वा यथारुचि ।
करणैरङ्गहारः स्यात् संग्रहे[4]णाधुनोच्यते ॥235॥

[अङ्गहारोद्देशः]

प्रथम[:] स्थिरहस्त [:] स्यात् ततः पर्यहस्तसञ्ज्ञकः ।
सूचीविद्धोऽपविर्द्धश्च ततश्चो[5]क्षिप्तनामकः ॥236॥

उद्घाटितालयश्चान्यो विष्क[6] म्भ[:] स्यात् पराजितः[7] ।
विष्कम्भापसृत[8]श्चैव मत्तकीडाभिधस्तथा ॥237॥

रेचितस्वस्तिकाद्यश्च पार्श्व स्वस्तिकसंज्ञ[9] कः ।
वृश्चिकापसृतश्चान्यैस्तथाऽन्यो भ्रमराभिध [:]॥238॥

मत्तस्खलितनामा च मदाद्[10] विलसितोऽपरः ।
गतिमण्डलविज्ञेय [:] परिच्छिन्नस्तथाऽपरः ॥239॥

परिवृत्ताद्रेचितश्च तथा वैशाखरेचितः ।
परावृत्तो ह्यलात[1] श्चपार्श्वच्छेदस्त[2] तः परः ॥240॥

---

[1] M.य अ ।
[2] M.नम् ।
[3] M.थि ।
[4] M.तदुरे उद्देशेनाधुनोच्येते इत्यपि स्यात् ।
[5] M.व्या ।
[6] M.ष्क ।
[7] N.S.अपराजितः ।
[8] M.ति ।
[9] M.ज्ञि ।
[10] M.दां ।

In Public domain. Digitization Muthulakshmi Research Academy

विद्युद्भ्रान्तस्तथो[3][द]वृत्त आलीढो[4] रेचि[5]तस्तथा ।
तथाच्छुरितसंज्ञश्च परो ह्या[6] क्षिप्तरेचितः ॥241॥

संभ्रान्तोऽप्य[प]सर्प्यश्च तथैवार्धनिकुण्टकः ।
इति संख्याऽङ्गहाराणां द्वात्रिंशत् कथिता स्फुटम् ॥242॥ इत्युपदेशः[7]

अथ लक्षणम् ॥

हस्तौ प्रसार्य चो[त्] क्षिप्य समपादं विधाय च ।
स्वस्तिकापसृतिं पाणिं स[व्य] मर्ध्वं[8] प्रसार्य च ॥243॥

प्रत्यालीढं[9] च निष्पाद्य[10] निर्वर्त्य च निकुण्टकम् ।
ऊरू[द्] वृत्तमतः[11] कृत्वा [स्वस्तिका] क्षिप्तकं तथा ॥244॥

नितम्बं करिहस्तं च कटिच्छिन्न[12]मतः परम् ।
अङ्गहारद्वयस्याग्रे स्थिरहस्तं प्रकल्पयेत् ॥ 245।। इति स्थिरहस्तः[13]

तलपुष्पपुटं पूर्वमपविद्धं विवर्तितम् ।
निकुण्टकविधानं स्यादूरू[14]द्धृत्तमतः परम् ॥246॥

आक्षिप्ताख्यं[15] ततश्चान्यमूरु[1]मण्डलसंज्ञकम् ।

---

[1] M.द ।
[2] M.त्त ।
[3] M.मथो ।
[4] M.लाटो ।
[5] M.रोचि ।
[6] M.व्या ।
[7] इत्यद्देश इति स्यात् ।
[8] M.र्ष ।
[9] M.प्रयाताटं ।
[10] M.द्या ।
[11] M.त्तिनत ।
[12] M.क्षीण ।
[13] M.स्तकम ।
[14] M.स्यात् दुत्तू ।
[15] M.त्यं ।

In Public domain. Digitization Muthulakshmi Research Academy

नितम्बं करिहस्तं च कटिक्षीणमतः परम् ।
क्रमेण यत्र पर्यस्त[:] सोऽङ्गहार[:]प्रकीर्तितः[2] ॥247॥ इति पर्यस्तः

अलपल्लवनामादौ सूची चाक्षिप्तमेव च ।
आवर्तितं निकुट्टं स्वादूरुद्धृत्तमतः परम् ॥248॥

आक्षिप्तसंज्ञकं यस्मिन्नुरोमण्डलनाम च ।
करिहस्तं कटिच्छिन्नं सूचीविद्धः[3] स उच्य[4]ते ॥249॥ इति सूचीविद्धः ।

यत्रापविद्धमादौ स्यात् सूचीविद्धमतः परम् ।
पाणि[5]नोद्वेष्टितेन स्यात् त्रिकस्य परिवर्तनम् ॥250॥

उरोमण्डलिनौ पाणी कटिच्छिन्नमतः परम् ।
अपविद्धाभिधानोऽयमङ्गहार [:] प्रकीर्तितः ॥251॥ इति अपविद्धः[6]

नूपुरं करणं पूर्वं विक्षिप्ताला[7]तके ततः ।
आक्षिप्तसंज्ञकं तद्वदुरोमण्डलनामकम् ॥252॥

अनन्तरं नितम्बं च करिहस्तमतः परम् ।
कटीछिन्नं च यत्र स्यादाक्षिप्त [:] सोऽङ्गहारकः ॥253॥ इति आक्षिप्तः[8] ।

उद्वेष्टितापविद्धश्च हस्तश्चाङ्घ्रिर्नि[9]कुट्टितः ।
प्रकारेणाथ तेनैव वामपार्श्वे भवेत् पुनः ॥254॥

उरोमण्डलिनौ पाणी[10] नितम्ब(:) करिहस्तकः[11]।

---

[1] M.तो चान्यं ।
[2] M.पर्यस्तलक्षणम् आदर्शे द्विरावृत्तम् ।
[3] M.प्रति ।
[4] M.दु ।
[5] M. मणि ।
[6] M.द्धम् ।
[7] M.ताल ।
[8] M.प्तम् ।
[9] M.नि ।
[10] M.नां ।
[11] M.कम् ।

In Public domain. Digitization Muthulakshmi Research Academy

कटिच्छिन्नं च यत्र स्याद् भवेदुद्धटितं स्तदा ।।255।। इति उद्धटितः[1] ।

उद्वेष्टितौ क्रमात पाणी पादावपि निकुट्टितौ ।
कुट्टितावं[2] चितौ[3] स्यातामूरूद्धृत्तमतः परम् ।।256।।

चतुरस्त्रं करं कृत्वा यत्र पादे निकुट्टनम् ।
करिहस्तं कटिच्छिन्नं विष्कम्भ[:] स तु कथ्यते ॥257।। इति विष्कम्भः ।

दण्डपादं[4] विधायाङ्घ्रि[5] विक्षिप्ताक्षिप्तकं परम् ।
हस्तं च व्यंसितं वा[6]ममङ्घ्रिणा सह सर्पयेत्[7]।।258॥ इति [मत्त] क्रीडाभिधः ।

X X X X X X X X

X X X X X X X X।। इति परावृत्तः[8] ।

करणं खस्तिकं पूर्वं हस्तौ च व्यं[9]सितौ ततः ।
अला[10]तकं प्रयोक्तव्यमूर्ध्वं जानुनि कुञ्चितम् ॥259॥

अर्धसूची च विक्षिप्तमुद्धृत्ताक्षिप्तकं ततः ।
करिहस्तं कटिच्छिन्नं यत्र स स्यादलातकः ॥260।। इति अलातः[11] ।

उर [:] स्थले करौ कृत्वा प्रयुं[12]जीतार्धजानुकम् ।
आक्षिप्तस्वस्तिकादूर्ध्वं त्रिकस्य परिवर्तनम् । 261।।

---

[1] M.दूद्धृहित ।
[2] M.तांव ।
[3] M.तां ।
[4] M.द ।
[5] M.योघ्रि ।
[6] M.धा ।
[7] अतः परमादर्शः खंडित इति प्रतिभाति । परमत्र खंडनसूचकं किमपि चिह्नं नास्ति । इति क्रीडाभिध इत्यतः परं त्वादशे एव खंडन चिह्नं वर्तते इत्यस्माभिस्तद् यथा प्रदेशं दत्तम । क्रीडाभि इति न सम्यक् उद्देशानुसारेण मत्तक्रीड इति भवेत् । भरतागमे तु मत्ताक्रीड इति नाम । एतेन पराजितस्य कियानंशो नवम दशमौ चाङ्गहारौ खंडिताविति ज्ञायते । ग्रन्थोल्लिखित खंडितांशे च एकादशादेकविंशांतानामं गहाराणां लक्षणानि खंडितानीति ।
[8] M.त्तम् ।
[9] M.व्य ।
[10] M.ल ।
[11] M.ता ।
[12] M.चु ।

In Public domain. Digitization Muthulakshmi Research Academy

उरोमण्डलिनौ हस्तौ नितम्ब[:] करिहस्तकः[1] ।
कटीछिन्नं भवेद् यस्मिन् पार्श्वच्छेदः स कथ्यते ॥262।। इति पार्श्वच्छेदः

वामः सूचीक्रम[:]कार्यौ विद्युद्भ्रान्तश्च दक्षिणः ।
सूचीविद्धश्च[2] चरणो[3] विद्युद्भ्रान्तस्ततः परम् ।
अनन्तरं परिच्छिन्नं स्वस्तिकान्तश्च(?)वामकम् ॥263॥इति विद्युद्भ्रान्तः[4] ।

विधा[5]य नूपुरं पादं पाणी पार्श्वप्रलम्बितौ ।
लताख्यं च कटीछिन्नं भवेदुद्वृत्तकाभिधे ॥264॥ इति उद्वृत्तः ।

आलीढव्यं[6] सितौ हस्तौ यत्र स्कन्धे निकुट्टयेत् ।
[7]चरणे नूपुरो वामे दक्षिणेऽलातसंज्ञकः[8] ॥265॥ इति आलीढ [:]

आधा [य] रेचित पाणिं पार्श्वमानम्य[9] रेचयेत् ।
भूयश्चान्येन योगेन गात्रमानम्य[10] रेच[11] येत् ॥ 266॥

रेचितं करणं कुर्यादुरोमण्डलकं ततः ।
कटिच्छिन्नश्च यत्र स्यादङ्गहारः स रेचितः[12] ॥267।। इति रेचितः

करणान्नू[13]पुरादूर्ध्वं त्रिकस्य परिवर्तनम् ।
करण[14]व्यंसितेनाथ भूयस्त्रिकविवर्तनम् ।
अलातकं विधायाथ सूची ततः प्रयोजयेत् ॥268 ॥

---

1 M.कम् ।
2 M.क ।
3 M.ण ।
4 M.इति अतिक्रांतयापकम् । लक्षणमिदं खंडितमिति प्रतिभाति ।
5 M.द्धा ।
6 M.ढारव्य ।
7 M.क ।
8 M.एतदपि लक्षणमसंपूर्णमिति प्रतिभाति ।
9 M.स्य ।
10 M.स्य ।
11 M.सेव ।
12 M.तम् ।
13 M.नू ।
14 M.णो ।

In Public domain. Digitization Muthulakshmi Research Academy

करिहस्तं कटिच्छिन्नं भवेदाच्छु[1]रिताभिधः[2] ॥269॥ इति[3] आच्छुरित:[4]

रेचितस्वस्तिकावङ्घ्री करावपि[5] तथाभिधौ ।
तेनैवविधिना भूयो[6] विश्लेषं परिचर्यं च[7] ।।270।।

उत्क्षे[8]पणं पुनश्चैव रेच [केनव] कम्पयेत् ।
उद्वृत्तकमथाक्षिप्तमुरोमण्डलकं ततः
यत्र स्यादङ्गहारोऽयं भवेदाक्षिप्तरेचितः ॥271।। इति आक्षिप्तरेचितः[9]।।

विक्षिप्तमिव चेत् पादौ पाणिपादमुखानुगम् ।
कृत्वा सूचीमुखं वामं पादं पश्चाच्च निक्षिपेत् ॥ 272॥

सव्यो वक्षस्थले हस्तो वामश्चैव लताकरः ।
आक्षिप्तकं पुनर्यत्र पादं स्वस्तिकरेचितः ॥273॥

नितम्बकरिहस्ताख्य उरोमण्डलकं ततः ।
कटिच्छिन्नश्च संभ्रा[10]न्तः सोऽङ्गहारो मनोहरः ॥274।। इति संभ्रान्तः ।

विधा[11]याङ्घ्रिमपक्रान्तं हस्त [12]व्यंसित[13]मेव च ।
उद्वेष्टितं ततः कार्यमर्धसूची ततः परम् ॥275॥

विक्षिप्तं च कटिच्छिन्नमुद्वृ[14]त्ताक्षिप्तके ततः।
करिहस्त कटीछिन्नं विधेयमप[1]सर्पिते ।।276।। इति अपमर्पितः[2]।

---

[1] M.वु ।
[2] M.धम् ।
[3] M.क्षु ।
[4] M.तम् ।
[5] M.भि ।
[6] M.या ।
[7] M.य ।
[8] M.उद्धे ।
[9] M.तम् । व्याक्षिप्तरेचित इत्युद्देशे ।
[10] M.चा ।
[11] M.द्या ।
[12] M.स्त ।
[13] M.व्यस्तित ।
[14] M.ग्र मुद्धित्त ।

In Public domain. Digitization Muthulakshmi Research Academy

नूपुराख्यं क्रमं[3] कृत्वा तमेव द्रुतमा[4]क्षिपेत् ।

कार्यौ पादानुगौ हस्तौ त्रिकस्य परिवर्तनम् ।

करिहस्तं कटिच्छिन्नं यत्र सोऽर्धनिकुण्टकः ॥277॥ इति अर्धनिकुण्टकः

द्वात्रिंशदङ्गहाहाराणां नाट्यनृत्यप्रयोगिणाम्[5] ।

इति लक्षणमस्माभिर्यथावत् प्रतिपादितम्[6] ॥278॥ इति द्वात्रिंशदङ्गहाराः[7] ।

अथ रेचकलक्षणम् ॥

ग्रीवारेचक एक[:] स्यात्तत[:]स्याद्धस्तरेचकः ।

कटीरेचकसंज्ञोऽन्यस्ततः स्यात् पादरेचकः ॥279॥ इति रेचितचतुष्टयम्

[अथ नृत्यलक्षणम्]

चतुर्विंशत्यभिनयैरसंयुतकरः क्रमात् ।

करानुगश्च चरणो[8] यथाशोभं तथाचरेत् ॥ 280 ॥

जाहरेति समुच्चार्य माचरेति पुनः स्मरेत् ।

चतुर्विंशकरैरन्ते क्रियते भ्रमरी[9] ततः ॥281॥

तदन्ते विजहीति क्ताऽ X X X X X ।

X X X X इति नेरीं[10] प्रचक्षते ॥ 282 ॥ इति नेरीनृत्यम् ।

---

[1] M.भपि ।
[2] M.तम् । अपसर्प्य इत्युद्देशे ।
[3] M.कर्म ।
[4] M.म ।
[5] M.णम् ।
[6] M.त ।
[7] M.रः ।
[8] M.णे ।
[9] M.क ।
[10] M.री ।

In Public domain. Digitization Muthulakshmi Research Academy

शब्दनृत्यन्तु कथितं शब्दा[1] क्षरसमुच्चरम् ।

अक्षरोपरि घातस्य शब्दान्ते भ्रमरी भ्रमन् ॥283।। इति शब्दनृत्यम् ।

सर्वाभिनयसंयुक्तं रसभावसमन्वितम् ।

लयतालसमाकीर्णं प्रबन्धादिविनिर्मितम् ।

स्वरपाटादिसंकीर्णं तन्नृत्यं गीतसंज्ञकम् ।।284 ।। इति गीतनृत्यम्

[अथ चिन्दुगीतलक्षणम्]

उद्ग्राहश्चान्तरं भोगे ध्रुवद्राविडभाषया ।

रागतालेन केनापि तद्[2] गीतं[3] चिन्दुसंज्ञकम् ॥285॥

X X X X गालस्त्रृ[4]तीयः शुद्धचिन्दुकः । (कोलचिन्दुनृत्यम्)

सार्धहस्तं परीमाणं[5] हण्डिका चित्रवर्णिका ।

..... हीत्वा च नृत्यं तत् कोलचिन्दु[6] जगुर्बुधाः ।।286।।

(वङ्गालचिन्दुनृत्यम्)

करेके(?)जलपात्रं स्यात् X X X X कम् ।

गृहीत्वा नृत्यते यत्तु[7] तद्वङ्गालमुदाहृतम् ।।287 ।। इति शुद्धचिन्दुनृत्यम्[8] ।

(अथ कल्पनृत्यम्)

द्वौ त्रयश्चतुनिर्वा(?) मिलित्वा यत्तु[9] नृत्यते ।

---

[1] M.द्व ।
[2] M.तं ।
[3] M.तं वि ।
[4] M.स्त्रि ।
[5] M.नं ।
[6] M.न्दु ।
[7] M.स्तु ।
[8] M.शुद्धचिन्दुनृत्यस्य लक्षणं खंडितमिति मन्ये ।
[9] M.स्तु ।

In Public domain. Digitization Muthulakshmi Research Academy

कल्पनृत्यं[1] च तत्[2] प्राहुर्नृत्यशास्त्रविशारदाः ।। 288।। इति कल्पनृत्यम् ।

इति परौजसाह्या वंशान्वये मालिनीमनोहर – कामिनीकामपूरण[3]-विरहिणी[4] विरहभञ्जन – सदावसन्तानन्दकन्दारिगजमस्तकांकुश- श्रीमत्ततारसाह्यात्मज-महमद्दसाहिविरचितायां सङ्गीतमालिकायां नृत्याध्यायः समाप्तः ।।

।।शुभं भवतु ।।

---

[1] M.इत्थं ।
[2] M.तं ।
[3] M.न ।
[4] M.हनी ।

In Public domain. Digitization Muthulakshmi Research Academy

श्लोकानुक्रमणिका

Alphabetical Index of the Verses of the Sangita-Malika

श्लोकः	श्लोकाङ्कः
(अ)	
अग्रत(:) पा	194
अङ्गुलीपञ्चकं	40
अङ्गुल्यः करयो	48
अङ्गुल्यःकुञ्चिता	41
अङ्गुल्योऽङ्गुष्ठ	31
अङ्गुष्टमध्यमा	43
अङ्गुष्टमुष्टिक	27
अङ्गुष्टसहिता	32
अङ्गुष्टेन	26
अङ्गुष्ठो वृ	206
अङ्घ्रिं कुञ्चित	259
अङ्घ्रणैकेन	163
अङ्घ्रेरल्पा	114
अञ्जलिः प्रथमः	44
अङ्गुतां	204
अतिक्रान्तगतं	233
अधोमुखा	220
अनन्तरं	253
अन्योन्यं पार्श्वयोः	47
अन्योन्यपादः	121
अन्योन्यबाहु	51

In Public domain. Digitization Muthulakshmi Research Academy

अभिवक्षः	58
अरालखटका	60
अर्धसूची च	260
अलपल्लव	80
अलपल्लव	248
अलातकं	269
अलाताङ्घ्रि	222
अवहित्थं	227
अस्यैव तर्जनी	28
अस्यैव यदि	25
अस्यैव यदि	30

(आ)

आ (कु)ञ्चितस्य	162
आक्षिप्तसं	249
आक्षिप्ताख्यं	247
आदौ तु	200
आधा(य) रेचितं	266
आलीढव्यं	265
आलीढाङ्ग	174
आवर्तिताः	35
आविद्धापाद	137

(इ)

इतश्चेतश्च	144
इदानीमङ्ग	235

(उ)

उच्चैः कृतं	17

In Public domain. Digitization Muthulakshmi Research Academy

उत्क्षेपणं	271
उत्सङ्गो	45
उद्ग्राहश्चान्तरं	285
उद्घाटिताल	237
उद्घातपल्लवौ	76
उद्वेष्टिताप	254
उद्वेष्टितौ	256
उपरिष्टेन	197
उर(:)स्थले	261
उरगत्रासितां	199
उरोदेशे	224
उरोमण्डलिनौ	251
उरोमण्डलिनौ	255
उरमण्डलिनौ	262
(ऊ)	
ऊरुयुग्मस्य	119
उरौ पार्श्वेन	157
ऊर्ध्वजानुर्य	208
ऊर्ध्वमण्डलिनौ	191
ऊर्ध्वमण्डलिनौ	215
ऊर्ध्वमण्डलिनी	63
ऊर्ध्वा कनी	38
(ए)	
एक उद्वेष्टिते	87
एकतालान्तरौ	169
एकपादः	170

In Public domain. Digitization Muthulakshmi Research Academy

एकपादे	152
एकवारमधो	22
एकोऽङ्घ्रि(:)	186
एको हस्तो	225

(क)

कटीनतम्बगो	176
कटीमस्तक	81
कपित्थस्यैव	29
कम्पितं तु	19
कम्पितोद्वा	94
करंमुकुल	52
करणं स्वस्तिकं	259
करणान्नूपुरा	268
करभङ्गी त	227
करावराल	49
करेके (:) जल	287
करौ प्रसारिता	93
किञ्चित् प्रसार्य	122
किञ्चिदुत्प्लुत्य	113
कुञ्चिताकुञ्चितं	158
कुञ्चिताङ्गुलि	101
कुञ्चिते स्वस्तिकी	142
कुञ्चितो(त्)	218
कृता तु ज	223
कृत्वा च नूपु	214
कृत्वा बद्धां	205

In Public domain. Digitization Muthulakshmi Research Academy
कृत्वा मद्	229
क्रमाद्भवन्ति	6
(ख)	
खटकामुख	193
खटकास्यौ	50
(ग)	
गत्युन्मुखा च	179
गालस्तृ	286
ग्रीवरेचक	279
(च)	
चञ्चत्काश्मीर	1
चतुरस्त्रं	2
चतुरस्त्रौ	59
चतुर्विंशत्यभि	280
चरणं वृश्चिकं	202
चरणचार	118
चरणैकेन	105
चरणोऽग्रे	149
चरणौ नूपुरौ	131
चरणौ स्व-स्व	111
चर्यौ विद्धा	198
चारीं कृत्वा	231
चारीं कृत्वा	233
चारी द्विधेति	106
चारी बद्धा	123
(छ)	

In Public domain. Digitization Muthulakshmi Research Academy

छिन्ना तिर्यङ्मुखे 97

(ज)

जङ्घावर्तस्थ 141

जङ्घास्वस्तिक 115

जाहरेति 281

(ड)

डमरी कुञ्चित 155

(त)

तताङ्घ्रिरुत् 154

तथा च पार्श्वे 86

तदन्ते विजहीति 282

तदेव शीघ्रता 16

तदेवैकाङ्घ्रि 196

तलपुष्प 246

तस्मिन् कनिष्ठ 33

तालमात्रं 112

तालवृन्त 65

तावेव च परा 82

तावेव हंस 68

त्रिपताकौ 80

त्रिपताकौ पताकौ 83

त्रिपताकौ यदा 79

(द)

दक्षिणश्चरणो 187

दण्डपक्षौ 62

दण्डपादं 258

In Public domain. Digitization Muthulakshmi Research Academy
दोलापादेऽ 230
द्रुतं गता 95
द्वात्रिंशदङ्ग 278
द्वौ त्रयश्च 288

(ध)

धरण्यां चर 146
धूतं विधुत 13

(न)

नन्द्यावर्तस्य 183
नन्द्यावर्तौ 140
नर्तको नर्त 189
नातिदीर्घा 8
निकुट्टनान्मिथो 148
निजस्थानगतौ 70
नितम्बं करि 245
नितम्ब-करि 274
नितम्बक्षेत्र 124
नितम्बनी 7
निषण्णोरुसमो 117
निहञ्चितं 14
नूपुरं करणं 252
नूपुराख्यं 277
नृत्यन्तु द्विविधं 10

(प)

पक्षस्थौ चरणौ 172
पताकस्यैव 24

In Public domain. Digitization Muthulakshmi Research Academy

पताकाकार	46
पराङ्मुखौ	57
परिवृत्ताद्रे	240
पल्लवाख्यौ शिर	91
पश्चात् प्रसा	127
पात्रं चतुर्विधं	5
पादो दक्षिण	277
पादयोः स्वस्ति	166
पार्श्वतः केश	78
पार्श्वाक्रान्ता	17
पार्श्वेन भ्र	226
पार्ष्णजङ्घे	184
पार्ष्णिमूलेऽन्यपादाग्रं	134
पुंसि कृतं	11
पुरःसरणम	150
पुरस्ताद्धुरसो	69
पुरोगगन	161
पृष्ठतो भ्रा	216
पृष्ठतो वलितं	132
पृष्ठेऽङ्घ्रिः	210
प्रणम्य परमा	1
पत्यालीढं	244
प्रथमस्थिर	236

(ब)

बधोपक्रान्त	219
बहुदः सगुणो	3

In Public domain. Digitization Muthulakshmi Research Academy
(भ)
भुजङ्गमस्तकौ 72
भुजांश-कूर्पं 71
भूमिं घृष्ट्वा 143
मूमेरुर्ध्वंनि 171
भूस्थापार्ष्णि 100
(म)
मणिबन्ध 67
मणिबन्धसम 89
मत्तस्खलित 239
मध्यमाङ्गुष्ठ 34
मध्यमाङ्गुष्ठतर्जन्यः 37
मध्यमाङ्गुष्ठसं 42
मध्यमाङ्गुष्ठसन्दं 36
मिथोमुखा 221
मुष्टिक-स्वस्तिकौ 92
मृदुर्वाग्मी 4
(य)
यत्र स्वस्तिक 156
यत्राङ्गुल्यश्चैक 23
यत्राङ्गुष्ठस्य 39
यत्रापविद्ध 250
यदाऽग्रतल 109
यदि पाद 104
यश्चान्यस्य 151
यस्यां पुरो 153

In Public domain. Digitization Muthulakshmi Research Academy

यस्योत्क्षिप्ता	103
(र)	
रूपवान्	9
रेचितं करणं	267
रेचितं शनकै	15
रेचितस्वस्ति	238
रेचितस्वस्ति	270
रेचितो दक्षिणो	74
(ल)	
लताकरौ	211
लताख्यौ केशबन्धौ	61
लताहस्त	35
ललाटकूर्परा	75
ललिता वनिता	165
(व)	
वक्रं चरणं	125
वक्रितं चरणं	129
वक्रितं चरण	130
वक्रितो(त्)	126
वक्रितो(त्)	128
वक्षसि मुष्टि	120
वर्धमाने तु	181
वर्धमाने स्थितौ	139
वामः सूची	263
वामः स्वाभा	102
वामदक्षक	192

In Public domain. Digitization Muthulakshmi Research Academy

वामस्तालान्तर 175
वामो यत्र 173
वाह्यपार्श्वेन 160
विक्षिप्तं च 276
विक्षिप्तमिव 272
विद्यद्भ्रान्त 241
विद्वद्वैद्य 2
विधाय नूपुरं 264
विधायाङ्घ्रिमप 275
वियोगः सम 110
विश्लिष्टज 136
विषुणे 188
वृश्चिकाङ्घ्रिं 213
वृश्चिकौ चरणौ 203
व्यावृत्तपरि 90
व्यावृत्तिपरि 207

(श)

शकटास्माभ 232
शनैरुच्चलिता 96
शनैरूर्ध्वं 20
शब्दनृत्यन्तु 283
शिथिलांसौ 53
शिरः पराङ्मुखी 21
शिरोवक्षः 12
श्रवणस्य करि 209

(स)

In Public domain. Digitization Muthulakshmi Research Academy

संभ्रान्तो	242
स चेत् पृष्ठे	164
समपादं	168
समपादंभुवि	195
समपादस्थिते	234
समपादौ	107
समस्याङ्घ्रेर्जा	182
समस्यैकप्य	178
समाङ्घ्रेरग्र	116
समानकूर्परौ	64
समोऽञ्चितः	99
सर्पशीर्षकरौ	56
सर्वतो भ्रम	98
सर्वाभिनय	284
सव्योवक्ष	273
सूचीपादौ	285
स्कन्धदेशाद्विनि	77
स्कन्धादवनतं	18
स्थानकान्यथ	167
स्थित्वा वर्ता च	108
स्थित्वा स्वस्तिक	138
स्फुटिताऽग्रे	145
स्वस्तिकौ स्ख	228
स्वस्तिकौ हंस	180
(ह)	
हंसपक्षौ	66

In Public domain. Digitization Muthulakshmi Research Academy

हंसपक्षौ	73
हंसपक्षौ यदा	84
हरिणप्लुतमा	212
हस्तावराल	85
हस्तिहस्तौ	201
हस्तौ पताका	56
हस्तौ प्रसार्य	246
हस्तौ सर्पशिरः	55

In Public domain. Digitization Muthulakshmi Research Academy

In Public domain. Digitization Muthulakshmi Research Academy

In Public domain. Digitization Muthulakshmi Research Academy

संस्कृत अकाडमी

(केन्द्रीयसंस्कृतविश्वविद्यालयेन मानिता आदर्शसंस्कृतशोधसंस्था)

उस्मानियाविश्वविद्यालयः, हैदराबाद् - 07

2024

ISBN - 978-81-969575-1-3